International Journal of Applied Research 2016; 2(1): 828-830




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(1): 828-830
www.allresearchjournal.com
Received: 22-11-2015
Accepted: 24-12-2015

**डॉ. परमेश्वर साहु**
तमुरिया, जिला-मधुबनी बिहार, भारत

**Corresponding Author:**
**डॉ. परमेश्वर साहु**
तमुरिया, जिला-मधुबनी बिहार, भारत

# धातूपसर्गसाधनसम्बन्ध-समीक्षा

**डॉ. परमेश्वर साहु**

**प्रस्तावनाः**

अतिरोहितः रूल्वेष विषयः पुरस्तात् विदुषां यद् व्याकरणशास्त्रं निखिलशास्त्रोपयोगि प्रधानञ्च षडङ्गेषु मुखमिवेति। तत्र प्रभवति, अनुभवति, विहरति, आहरतात्येवमादयः सोपसर्गाः प्रयोगा दरीदृश्यन्ते लोके। तत्र किमादौ धातूपसर्गयोः संबन्धः प्रतिपादनीयः, उत धातुसाधनसंबन्धः ? इत्येवं शङ्का समुदेति। एतच्छङ्कायाः समाधानात्प्राक् धातुपसर्गसाधनेतिशब्दानामर्थो विव्रियत। 1. "भूवादयौ धावतः" [1] इति सूत्रानुसारं क्रियावाचिनो भुप्रभृतयो धातुसंज्ञां भजन्ते। भुप्रभृतयो धातवे इत्येतावन्मत्रोक्तो या शब्दस्य द्वितीयाबहुवचने याः पश्यसीत्यादौ धातुत्वमापद्येत। तथा च विश्वप इत्यादाविव "आतो धातोः" [2] इत्याकारलोपः प्रसज्येत्। अतस्तद्वारणाय क्रियावाचित्वेति विशेषणम्। तावन्मात्रोक्तौ च वर्जनाद्यर्थकानां हिरूक्, प्रताम्, कूपत् इत्याद्यव्ययानां धातुत्वं प्राप्नोति। (प्रताम्=ग्लानिः, कृषत्=प्रशंससा)। तथा च तेभ्यस्तिङाद्युत्पत्तिः स्यात्। अतो भ्वादिगणपठितत्वमिति विशेषणं निवेश्यते। एवञ्च क्रियावाचकत्वे सति भ्वादिगणपठित्वं धातुलक्षणम्। 2. उपसर्गो नाम "उपसर्गाः क्रियायोगे" [3] इति सूत्रानुसारं क्रियायोगे प्रादिर्निपातः। 3. साधनं नाम साध्यते = निष्पाद्यतेऽनेन क्रियते व्युत्पत्त्या कारकमित्यर्थः। तदुक्तं भर्तृहरिणा = "क्रियाणामभिनिष्पत्तौ सामथ्र्यं साधनं विदुः" इति। पाक-गमनादीनां क्रियाणामभिनिष्पतौ = जननेः, सामर्थ्यम् द्रव्यगतां शक्तिं साधनं विदुरित्यर्थः।

सम्प्रति प्राक्तनशङ्कायाः समाधानमुच्यते।

अत्र दीक्षिताशयः-

सोपसर्गस्थले उपसर्गाविशिष्टाद् धातोरेव विशिष्टबोधो जायते इत्युपसर्गसहित एव धातुस्तत्तत्क्रियावाची। "लुड्लङ्लृङ्क्वडुदात्तः" [4] "आडजादीनाम्" [5] इति सूत्रविहिताडागमादेव्र्यवस्थायै केवलं धातूपसर्गयोः पृथक्त्वेन कल्पनम्। तदुक्तं भर्तृहरिणा-अडदीनां व्यवस्थार्थ पृथक्त्वेन प्रकल्पनम् इति। अत एव उपास्यते गुरूरित्यत्र कर्मणि लकारः सिध्यति। अन्यथा केवलस्यस "आस उपवेशने इति धातोरकर्मकत्वेन स न स्यात्। पूर्वमुपसर्गयोगे तु धातोः सकर्मकत्वेन कर्मणि लकारः सिध्यति। सोपसर्गाणां सकर्मकत्वात्। अत एव "सुट्कात्पूर्वः" [6] इति सूत्रे भाष्ये "धातूपसर्गयोः कार्य यत्तदन्तरङ्गम। कुत एतत् ? पूर्वं धातुरूपसर्गेण युज्यते पश्चात्साधनेन" इत्युक्त्वा "यस्त्वसौ धातूपसर्गयोस्संबन्धस्तमभ्यन्तरकृत्य = संबध्य ततो धातुः साधनेन युज्यते। अवश्यं चैतदवं विज्ञेयम्। यो हि मन्यते पूर्वे धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तस्य आस्यते गुरूणेत्यकर्मकः उपास्यते गुरूरिति केन सकर्मकः स्यात् ? इत्युक्तम्। एवञ्च कर्तृकर्मादिसाधनप्रत्ययसंबन्धिकार्ययोगो बहिरङ्ग एव। अत एव संचकस्कारेत्यत्र "सुट् कात्पूर्वः" [7] इति पूर्व सुडागमस्ततः साधनप्रयुक्तं द्वित्वम् अत एव "कात्पूर्वः" इति भाष्ये प्रत्यख्यातम्। "अडभ्यासव्यवायेऽपि सुट् कात्पूर्व इति वक्तव्यम्" इत्येव सिद्धेः। उपपूर्वात् कृ हिंसायामिति धातोश्छेदनेऽर्थे "किरतौ लवने" [8] इति सुड् विहितः। तत्रेदं वात्तिकमलोक्यते। उदा-उपचस्कार, उपरिस्करत्। एवञ्च "संपरिभ्यां करोतौ भूषणे" [9] इत्यत्रैव सुडित्यंशः पठनीयः। इत्थञ्च "पर्वं धातुरूपसर्गेण युज्यते अत्र प्रश्नः-

प्रागुक्तदिशा "पूर्व धातुरूपसर्गेण युज्यते" इत्यर्थस्वीकारेऽध्ययतमित्यादिकं रूपं न सिध्येत्। तथा हि-अधि पूर्वादिङ् अध्ययन इति धातोः" ल्युट् च" [10] इति भावे ल्युटि, अनुबन्धलोपेऽनादेशे "सार्वधातुकार्धधातुकयोः" [11]

इति धातोरिकारस्य गुणे एकारेऽयादेशे उपसर्गस्थस्येकारस्य यणादेशे यकारेऽध्ययनीमित्यभीष्ट रूपम्। धातुपसर्गकार्यस्थान्तरङ्गत्वं पूर्व द्वयोरिकारयो सवर्णदीर्घे तन्न सिध्येत्- इति। अन्नोत्तरम्-

"णेरध्ययने वृत्तम्" [12] इति सूत्रऽध्ययनमिति निर्देशेन क्वचित् प्रत्ययनिमित्तकार्यात्प्रागुपसर्गकार्याप्रतिाज्ञापनेन दोषभावात्। "प्रत्ययः" इति निर्देश उपपद्यते। एवञ्चात्र ज्ञापकप्रामाण्येन पूर्व धातोः साधनेन योगेऽपि एतदितरत्र सर्वत्र पूर्व धातूपसर्गयोरेव संबन्धस्ततः साधनंसबन्धः। अतो न प्रागुक्तो दोषः इति।

अत्र नागेशसिद्धान्तः-

दीक्षिताशयो न युज्यते। सोपवर्गस्थले शुद्धधात्वर्थापेक्षयार्थान्तराबोधक त्वेनोपसग्स्यानर्ककत्वात्। अत्र च "सुट् कात्पूर्वः" [13] इति सूत्रस्थं भाष्यं प्रमाणम्। तथा हि- संचस्करतुः, सेचरस्करूरित्यादौ ऋदन्तस्य संयोगादेरङस्य गुणः स्यल्लिटीत्यर्थकेन "ऋतश्च संयोगादेर्गुणः" [14] इति सूत्रेण गुणप्रवृत्तये, समचिस्करदित्यादौ लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये इत्यर्थकेन "दीर्घो लघोः" [15] इति सूत्रेण दीर्घनिवृत्तये च "उपदेशिवद्वुवचनं च" इति वार्तिकमारब्धम्। अन्यथा पदद्वयाश्रयत्वेन सुटो बहिरङ्गत्वेनासिद्धत्वात् संयोगदित्वाभावेन गुणो न स्यात्, यङि दीर्घः स्याञ्च। अतो वचनमिदरमारभ्यत। ततोऽस्य वचनस्य प्रत्यख्यानाय सुट एवान्तरङ्त्ववेनासिद्धत्वात् भगवता भाष्यकृतोक्तम्-" धातूपसर्गयोः कार्यः यत्तदन्तरङ्गम्। कुत एतत् ? पूर्वं धातुरूपसर्गेण युज्यते पश्चात्साधनेन्" इति। (अत्र "उपसर्गेण"इत्यस्योपसर्गसंज्ञकशब्देन इत्यर्थः। एवं साधनेनत्यस्य साधनबोधकप्रत्ययप्रयुक्तकार्यणेत्यर्थः।) ततः "नैतत्सारम्। पूर्वं हि धातुः साधनने युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्तयति। तामुपसर्गो विशिनष्टि" इत्युक्तं भगवता भाष्यकृता। अत्र साधनेन साधनप्रयुक्तकार्यणेत्यर्थः। हि यतः, साधनं क्रियां निर्वर्तयति = साध्यत्ववैशिष्ट्येन बोधयति। अतः पूर्वं तत्प्रयुक्तं कार्यम्। ताम् = साध्यत्वेन बुद्धां क्रियाम्। उपसर्गः = तत्संज्ञकः शब्दः, विशिनष्टि स्वद्योत्यविशेषणवैशिष्टयेन बोधयति। साध्यत्वेन ज्ञानं विना ग्रियायोगे विहितोपसर्गसंज्ञकशब्देर्योगाज्ञानादित्यर्थः। ततः "सतयमेवमेतत्। यस्त्वसौ धातूपसर्गयोभिसंबन्धस्तमभ्यन्तरं धातुः साधनेन युज्यते" इत्युक्तम्।

अत एवोक्तं भर्तृहरिणाः-

स्थादिभिः केवलैर्यश्च गमनादि तु गम्यते।
तत्रानुमानाद् द्विविधात् तद्धर्मा प्रादिरूच्यते।।

अत्र = तद्धर्मा द्योतकत्वधर्मवानित्यर्थः। केवलेः = उपसर्गरहितेः। उपसर्गरहितः स्था धातुर्गतिनिवृत्तर्थकः। प्रतिष्ठते इत्यत्र गमनरूपमर्थ बोधयति। अतोऽनुमानप्रमाणेन स्था धातोः गमनार्थवाचकत्वसामर्थ्यमप्यस्तीति 'प्र' इत्युपसर्गस्तां शक्तिं केवलं द्योतयतीत्यर्थः। ष्ठागतिनिवृत्ताविति एकार्थबोधकपाठस्तु लोकप्रसिद्धिमाश्रित्य। एवञ्च पूर्वमुपसर्गेण योगो नाम तदर्थसंबन्धः। ततः उपसर्गयोगात्पूर्वं कार्ययोगः। तदनन्तरमुपसर्गशब्दयोग इति परिभाषाद्वयार्थः।

किञ्च "पूर्व धातुः साधनेन युज्यते" इत्यर्थस्वीकारे एव प्राणिदापयतीत्यत्र "यदागम" परिभाषायाः सञ्चारः। तथा हि प्र. नि इत्युपसर्गद्वयपूर्वकात् डु दाञ् दान इति धातोर्लटि प्रथमपुरूषैकवचने तिषि शपि श्लोद्वित्वेऽभ्यासहस्वे "नेर्गद" [16] इत्यादिना नेर्नस्य णत्वे कृते प्रणिददातीति रूपम्। तत्र प्रेरणार्थे णिचि "अर्तिं ह्रीं वीलकूयीक्ष्माभ्यातां पुङणौ" [17] इति सूत्रेण धातोः पुगागमे 'दा' मात्रस्यानर्थकत्वात् 'नि' इत्यस्य धुसंवनानिरूपितोपसर्गत्वाभावात् णत्वं न स्यादित्याशङ्क्य यदागमास्तुङ्डणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति। परिभाषयाधुत्वातस्य क्रियावाचकत्वेन तन्निरूपितोपसर्गत्वस्य नौ सत्त्वात् णत्वं सिध्यतीति समाहितम्। पूर्वं धातोरूपसर्गयोगे तु णिचः प्रागे (प्र.लि दी इति दशयामेव) णत्वप्रवृत्त्याणखं न स्यादिति शङ्कानसंगच्छेति। अतोऽनेनप्रमाणेन पूर्वधतुः साधनेन युज्यते पञ्चादुपसर्गेण इति कथनं युज्यते।

अतएवोक्तं भर्तृहरिणाः-

धातोः साधनयोगस्य भाविनः प्रकमाद्वथ।
धातुत्वं कर्मभावञ्च तथाऽन्यरपि दृश्चताम्।।

अत्राक्षेपः-

भर्तृहरेः स्वग्रन्थविरोधः। तथा "धातोः साधनयोगस्य" इत्यादिना प्राक्प्रदर्शितेन कारिकाद्वयेन पूर्वं धातोः साधनयोगः प्रतिपादितः। ततः प्राक्प्रदर्शितया-

अडादीनां व्यवस्थार्यं पृथक्त्वेन प्रकल्पनम्।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः।।

इति कारिकया पूत्र धातोरूपसर्गेण संबन्धो व्यवस्थापितः। अतोऽत्र कतरद्वा प्रमाणमाश्रयणीयमिति संदिग्धमेव इति। (कारिकायाम्- तादृशः एव = उपसर्ग सहित एव।)

अत्रोत्तरम्-

यद्यपि मर्तृहरिणा पक्षद्वयमपि प्रदर्शितं, किन्तु "सुट् कात्पूर्वः" [18] "उपपदमतिङ्" इति च सूत्रस्थभाष्य कैयटप्रामाण्यात् "धातोः साधनयोगस्य" इत्यादिकारिकाद्वयसिद्धोऽर्थ एव सिद्धान्ते समाश्रीयते। धातृपसर्गकार्यस्यान्तरङ्गत्वं तु पर्वोपस्थितान्तर्भूतार्थनिमितकत्वात्। तथा च यदुपर्सानिमित्तकमुपसर्गार्थश्रितम् = उसग्रद्योत्याथ्ज्ञेवशेषाश्रितं तत् अर्थविशिष्टोसर्गनिमित्तकत्वादन्तरङ्गम्। तथा च, उपसर्गाणां स्वरूपनिर्देशेषु अथ्रविशिष्टस्यैवोपर्गस्य निमित्तत्वादर्थद्वारा तन्निमित्तककार्यस्य पूर्वमुपस्थित्या तन्निमित्तकं कार्यमन्तरङ्गमित्ययं न्यायो धातूपसर्गया कार्यमन्तरङ्गमित्यस्य विषयः। "सम्परिभ्यां करोतौ भूषणें' [19] इति सूत्रे संपुरिभ्या मिति स्वरूपतस्तयोस्तदर्थस्य च निमित्तत्वेन स्वीकारात्। 'प्रत्ययः उत्योदौ तु सवर्णदीर्घस्य नैतादृशमन्तरङ्गत्वम्। तद्विधावुपसर्गस्य स्वरूपेणानिमित्तत्वात्। अतो न प्रागुक्तो दोषोऽत्र।

अत्र शङ्का-

साधनबोधकप्रत्ययविषये पूर्वोक्तदिशा पूर्व धातो, साधनेनैव योगोऽस्तु। किन्तु यत्र भावार्थकप्रत्ययो यथा- विपर्यय इत्यादौ वि- परीत्युपसर्गद्वयपूर्वकात् इण् गताविति धातोः भावे "एरच्" [20] इत्यच्प्रत्यायः अत्र प्रत्ययेन साधनं न बोध्यत इति पूर्व धातोस्तद्योगाभावेन उपसर्गेण योगेऽनिष्टं रूपमापद्येत इति।

अत्र समाधनम्

"णेरध्ययने वृत्तम्" [21] "व्यत्ययो बहुलम्' [22] इति निर्देशेन भावार्थकप्रत्ययस्यापि पूर्वमेवोत्पतिः। न चास्य ज्ञापकस्य साजात्यात् कृन्मात्रषियकत्वे भावतिङन्ते दोषस्तदवस्थ एवेति वाच्यम्। अस्य निर्देशस्य सामान्यापेक्षज्ञापकत्वेन भावितिङोऽपि पूर्वमेवोत्पत्या दोषाभावात्। वस्तुतस्तु ज्ञापकस्य विशेषपेक्षत्वेऽपि न दोषः। भावे

तिङि उपसर्गस्यैवाभावात्। एवञ्च पूर्वं धातोः साधनेन योगे विपर्यय इति रूपं न सिध्येदित्याक्षेपो न युज्यत एव। अत एवोक्तं वाक्यपदीये-

प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशिष्यते।
प्राक् च साधनसंबन्धात् क्रिया नैवोपजायते।। इति।

प्रयोगार्हेषु = कारकसंबंध प्राप्य धातुषु प्रयोगार्हेषु सत्सु, सिद्धः सन् = सिद्धरूपः, भत्तेव्योऽर्थः व्यावर्त्योऽर्थः, विशिष्यते = उपसर्गः विशिष्यते।

साधनसंबन्धात्प्राक् = कारकान्वयात् प्राक्, क्रियानैवोपजायते इत्यर्थः।

एवञ्च "पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण" इत्येव नागेशसिद्धान्तः। स्वरूपोऽर्थतश्च यत्रोपसर्गो निमित्तत्वेनाश्रीयते तत्र तु धातूपसर्गयोः पूर्वं संबन्धस्ततः इति सिद्धम्। स्पष्टमिदं सर्व लघुमञ्जूषाया।

**सन्दर्भाः**


1. पाणिनीयसूत्रम् - 1/3/1।
2. पाणिनीयसूत्रम् - 6/4/140।
3. पाणिनीयसूत्रम् -1-4-59।
4. पाणिनीयसूत्रम् - 6-4-72।
5. पाणिनीयसूत्रम् -6.-4-72।
6. पाणिनीयसूत्रम् -6-1-135।
7. पाणिनीयसूत्रम् -6-1-135।
8. पाणिनीयसूत्रम् -6-1-104।
9. पाणिनीयसूत्रम् -6-1-37।
10. पाणिनीयसूत्रम् -3-3-115।
11. पाणिनीयसूत्रम् -7-3-84।
12. पाणिनीयसूत्रम् -7-2-26।
13. पाणिनीयसूत्रम् -6-1-135।
14. पाणिनीयसूत्रम् -7-4-10।
15. पाणिनीयसूत्रम् -7-4-95।
16. पाणिनीयसूत्रम् -7-4-17।
17. पाणिनीयसूत्रम् -7-3-36।
18. पाणिनीयसूत्रम् -6-1-135।
19. पाणिनीयसूत्रम् -6-1-137।
20. पाणिनीयसूत्रम् -3-3-56।
21. पाणिनीयसूत्रम् -2-2-26।
22. पाणिनीयसूत्रम् -3-1-85।